"अपां समीपे नियतो नैत्यिकं विधिमास्थितः।
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ॥")

समीपता, स्त्री, नैकट्यम्। समीपत्वम्। सामीप्यम्। समीपशब्दात् तल्प्रत्ययेन निष्पन्नम् ॥

समीयः, त्रि, (सम + "गहादिभ्यश्च।" ४। २। १३८। इति छः।) समसम्बन्धी। तुल्यकारणकः। समशब्दात् छीयप्रत्ययेन निष्पन्नः ॥

समीरः, पुं, (सम्यगीर्त्ते गच्छतीति। सं + ईर गतौ + कः।) वायुः। इत्यमरः। १। १। ६५ ॥ (यथा, माघे। ४। ५४।

"समीरशिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम् ॥")

समीष्टः। इति राजनिर्घण्टः ॥

समीरणः, पुं, (समीरयतीति। सम् + ईर + ल्युः।) वायुः। (यथा, कुमारे। १। ८।

"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम् ॥")

मरुवकः। इत्यमरः। २। ४। ७८ ॥ पथिकः। इति मेदिनी ॥ (क्ली, सं + ईर + ल्युट्। प्रेरणम्। यथा, महाभारते। ८। ८४। २३।

"शराभिघाताच्च रुषा च राजन्
स्वया च भासास्त्रसमीरणाच्च ॥"*॥

प्रेरके, त्रि। यथा, हरिवंशे। १०२। २२।

"सोऽपिबत् पाण्डुराभ्राभस्तत्कालं ज्ञातिभिर्वृतः
वनान्तरगतो रामः पानं मदसमीरणम् ॥")

समुखः, त्रि, (मुखेन सह वर्त्तमानः।) वाग्मी। वावदूकः। इति हेमचन्द्रः ॥

समुचितः, त्रि, सम्यगुचितः। उपयुक्तः। यथा,—

"वदामस्ते किंवा जननि वयमुच्चैर्जड़धियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम्
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते
तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥"

इति तन्त्रसारधृतश्यामास्तोत्रम् ॥

समुच्चयः, पुं, (सं + उत् + चि + अच्।) समाहारः। इत्यमरः। ३। २। १६ ॥ यथा,—

"राशौ द्वयोर्बहूनाञ्च समाहारः समुच्चयः ॥"

इति शब्दरत्नावली ॥

(यथा, कुमारे। १। ४९।

"सर्व्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन।
सा निर्म्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्य्यदिदृक्षयेव ॥")

समुच्छेदः, पुं, विनाशः। संपूर्व्वात्पूर्व्वच्छिदधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ (यथा, किराते। ११। ४९

"वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम्।
निर्व्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥")

समुच्छ्रयः, पुं, (स + उत् + श्रि + अच्।) विरोधः। उत्सेधः। इति मेदिनी ॥ (यथा, रघुः। ९। २०।

"कनधूपसमुच्छ्रयशोभिनो
वितमसा तमसासरयूतटाः ॥")

समुच्छ्रायः, पुं, समुच्छ्रयः। समुत्पूर्वश्रिधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

समुच्छ्रितः, त्रि, उच्चः। समुत्पूर्व्वश्रिधातोः क्तप्रत्ययेन निष्पन्नः ॥

समुज्झितः, त्रि, (सम् + उज्झ उत्सर्गे + क्तः।) त्यक्तः। इत्यमरः। ३। १। १०७ ॥

समुत्क्रमः, पुं, ऊर्द्ध्वगमनम्। समुत्पूर्व्वक्रमधातोरल्प्रत्ययेन निष्पन्नः ॥

समुत्क्रोशः, पुं, (समुत्क्रोशतीति। सं + उत् + क्रुश + अच्।) कुररपक्षी। इति शब्दरत्नावली ॥ (भावे घञ्।) उच्चैःशब्दश्च ॥

समुत्थः, त्रि, (समुत्तिष्ठतीति। सं + उत् + स्था + कः।) समुद्भवः। समुत्थितः। समुत्पूर्व्वस्थाधातोर्डप्रत्ययेन निष्पन्नः ॥ (यथा, मनुः। ७। ४५।

"दश कामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत् ॥")

समुत्थानं, क्ली, (सम् + उत् + स्था + ल्युट्।) समुद्योगः। (यथा, महाभारते। ३। ३२। ७।

"सर्व्वं हि स्वं समुत्थानमुपजीवन्ति जन्तवः।
अपि धाता विधाता च यथायमुदके वकः ॥")

व्याधीनां निर्णयः। इति मेदिनी ॥ (यथा, मनुः। ८। २८७।

"अङ्गावपीड़नायाञ्च व्रणशोणितयोस्तथा।
समुत्थानव्ययं दाप्यः सर्व्वं दण्डमथापि वा ॥")

ऊर्द्ध्वगमनम्। सम्यक्प्रकारेण उत्थानम्। उत्तोलनम्। यथा,—

"इन्द्रध्वजसमुत्थानं प्रमादाच्च कृतं यदि।
तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः ॥"

इति तिथ्यादितत्त्वम् ॥

समुत्थितः, पुं, (सम् + उत् + स्था + क्तः।) सम्यगुत्थितः। यथा,—

"समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन्नमस्ते ॥"

इति तिथ्यादितत्त्वे शक्रोत्थानपूजामन्त्रः ॥

समुत्पन्नः, त्रि, (सम् + उत् + पद + क्तः।) समुद्भूतः। यथा,—

"पुस्तकस्था च या विद्या परहस्तगतं धनम्।
कार्य्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥"

इति चाणक्यम् ॥

समुत्पिञ्जः, त्रि, (सम् + उत् + पिजि हिंसायाम् + अच्।) अत्यन्तव्याकुलः। यथा,—

"उत्पिञ्जलसमुत्पिञ्जपिञ्जला भृशमाकुले ॥"

इति हेमचन्द्रः ॥

समुत्पिञ्जः, पुं, (सम् + उत् + पिञ्ज + पचाद्यच्। भृशमाकुलसैन्यम्। इत्यमरः। २। ८। ९८ ॥

समुत्सुकः, त्रि, (सम्यगुत्सुकः।) सम्यगुत्कण्ठितः। इति हेमचन्द्रे उत्सुकशब्दार्थदर्शनात् ॥ सम्यगिष्टार्थोद्युक्तः। इत्यमरे उत्सुकशब्दार्थदर्शनात् ॥ (यथा, रघुः। १। ३३।

"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥")

समुदक्तं, त्रि, (समुदच्यते स्मेति। सम् + उत् + अन्च + क्तः।) उद्धृतम्। कूपादेरुद्धृतजलादि। इत्यमरः। ३। १। ९० ॥

समुद्भूतः, त्रि, (सम् + उत् + भू + क्तः।) समुत्पन्नः। यथा, देवीमाहात्म्ये ५।

"साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिस्तूयतेऽत्र का
शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा ॥"

समुदयं, क्ली, (सम् + उत् + इण् + अच्।) लग्नम्। यथा,—

"सामर्थ्यं तनु कथ्यते समुदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने योधश्च सञ्चिन्तयेत्।"

इत्यादि ज्योतिस्तत्त्वम् ॥

षण्णाडीचक्रान्तर्गतचतुर्थनाड़ी। सा तु जन्मनक्षत्रावधिकाष्टादशनक्षत्ररूपा। तत्पर्य्यायः। सामुदायिकम् २। यथा, ज्योतिस्तत्त्वे।

"जन्मर्क्षं कर्म्म ततो दशमं सांघातिकं
षोड़शभम्।
समुदयमष्टादशभे विनाशसंज्ञं त्रयोविंशम् ॥
सन्तमे सामुदायिके मित्रभूत्यर्थसंक्षयः ॥"

समुदयः, पुं, (सम् + उत् + इण् + अच्।) समूहः। इत्यमरः। २। ५। ४० ॥ (यथा, कथासरित्सागरे। १०। १९६।

"तमुपाजग्मतुस्तौ च सेनासमुदयान्वितौ।
तं विज्ञायैव संबन्धं मुदा दुहितृवत्सलौ ॥"

युद्धम्। (यथा, महाभारते। ६। ११२। ४४।

"द्रोणः पाञ्चालपुत्त्रेण समागम्य महारणे।
महासमुदयं चक्रे शरैः सन्नतपर्व्वभिः ॥")

समुद्गमः। इति मेदिनी ॥ दिवसः। इति शब्दचन्द्रिका ॥

समुदागमः, पुं, (सम् + उत् + आ + गम + घञ्। समन्ताज्ज्ञानम्। इति त्रिकाण्डशेषः ॥

समुदाचारः, पुं, (सम् + उत् + आ + चर + घञ्।) आशयः। इति त्रिकाण्डशेषः ॥

समुदायः, पुं, (सम् + उत् + अय + घञ्।) समूहः। युद्धम्। इत्यमरः। २। ५। ४० ॥ २। ८। १०६ ॥ पृष्ठस्थायिबलम्। इत्यजयः ॥ समुच्छ्रयः। इति मेदिनी ॥

समुदितः, त्रि, सम्यक्प्रकारेण कथितः। संपूर्ववदधातोः क्तप्रत्ययेन निष्पन्नः। उदयं प्राप्तः। समुद्भूतः। संपूर्व्वात्पूर्व्वेन्धातोः क्तप्रत्ययेन निष्पन्नः ॥

समुद्गः, पुं, (समुद्गच्छतीति। सम् + उत् + गम् + अन्येष्वपीति डः।) सम्पुटकः। इति हेमचन्द्रः ॥ (यथा, रामायणे। २। ९१। ७५।

"शुक्लांशचन्दनकल्कांश समुद्गेष्ववतिष्ठतः ॥"

मुद्गेन सह वर्त्तमानः।) मुद्गसहितश्च ॥

समुद्गकः, पुं, (समुद्ग एव। स्वार्थे कन्।) सम्पुटकः। इत्यमरः। २। ६। १३८ ॥ सौपूड़ा इति ख्याते। समुद्गच्छतीति हनजनाद्गमादेरिति डे समुद्गः ततः स्वार्थे कः। सम्पुटति द्रव्यैः संश्लिष्टो भवति सम्पुटकः पुट श्लि श्लेषे इगुपधत्वात् कः ततः